श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

॥ प्रकीर्णपद्धतिः एकोनत्रिंशी ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

॥ प्रकीर्णपद्धतिः एकोनत्रिंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विधौ प्रवृत्ते यद्द्रव्यं गुणसंस्कारनामभिः।
श्रेयः साधनमाम्नातं तत्पदत्रं तथाऽस्तु मे॥ 29.1 ॥

मधुरस्मितरम्यमौक्तिकश्रीः
विशसि व्यञ्जितमञ्जुळप्रणादा।
सह रङ्गनृपेण वासगेहं
तनुमध्या मणिपादुके ! त्वमेका॥ 29.2 ॥

शुभशब्दविशेषसंश्रिताभिः
भवती शौरिपदावनि ! क्रियाभिः।
अनुतिष्ठति नूनमाश्रितानाम्
अखिलोपद्रवशान्तिकं नवीनम्॥ 29.3 ॥

मणिभिर्मधुवैरिपादरक्षे !
भवती विक्रमणे प्रवर्धमाना।
युगपद्भवतां युगान्तकाले
दिवि लक्ष्मीं विदधे दिवाकराणाम्॥ 29.4 ॥

मञ्जुस्वनां मणिमयूखकलापिनीं त्वां
दृष्ट्वा कपर्दसविधे विनिवेश्यमानाम्।

गूढीभवन्ति गरुडध्वजपादरक्षे !
    फूत्कारवन्ति पुरवैरिविभूषणानि ॥ 29.5 ॥

मध्ये परिस्फुरितनिर्मलचन्द्रतारा
    प्रान्तेषु रत्ननिकरेण विचित्रवर्णा।
पुष्णासि रङ्गनृपतेर्मणिपादुके ! त्वं
    चक्षुर्वशीकरणयन्त्रविशेषशङ्काम् ॥ 29.6 ॥

पादेन रङ्गनृपतेः परिभुज्यमाना
    मुक्ताफलप्रकटितश्रमवारिबिन्दुः।
उत्कण्टका मणिमयूखशतैरुदग्रैः
    सीत्कारिणीव चरणावनि ! शिञ्जितैस्त्वम् ॥ 29.7 ॥

दूरप्रसारितकरा निनदैर्मणीनाम्
    आयाति दैत्यरिपुरित्यसकृद्ब्रुवाणा।
दैत्येश्वरानभिमुखान् जनितानुकम्पा
    मन्ये निवारयसि माधवपादुके ! त्वम् ॥ 29.8 ॥

अच्छेद्यरश्मिनियतक्रमरत्नधुर्या
    निष्कम्पकूबरनिभं दधती प्रतीकम्।
क्रीडागतेषु मधुजित्पदपद्मलक्ष्म्याः
    कर्णीरथस्त्वमसि काञ्चनपादरक्षे ! ॥ 29.9 ॥

मञ्जुस्वना मरकतोपलमेचकाङ्गी
    शोणाश्मतुण्डरुचिरा मणिपादुके ! त्वम्।
पद्माविहाररसिकस्य परस्य यूनः
    पर्यायतां भजसि पञ्जरशारिकाणाम् ॥ 29.10 ॥

शोणोपलैश्चरणरक्षिणि ! संश्रितेषु
    छायात्मना मरकतेषु तवावगाढः।

अन्वेति शौरिरभितः फलपङ्क्तिशोभि -
    न्यात्मानमेव शयितुं वटपत्रमध्ये ॥ **29.11** ॥

स्फीतं पदावनि ! तव स्नपनार्द्रमूर्तेः
    आसागरं ततमभून्मणिरश्मिजालम्।
लीलोचितं रघुसुतस्य शरव्यमासन्
    यातूनि यस्य वलयेन विवेष्टितानि ॥ **29.12** ॥

रत्नांशुभिस्तव तदा मणिपादरक्षे !
    संरज्यमानवपुषां रजनीमुखेषु।
आकस्मिकागतमदर्शि महौषधित्वं
    साकेतपत्तनसमीपरुहां द्रुमाणाम् ॥ **29.13** ॥

रामे वनं दशरथे च दिवं प्रयाते
    निर्धूतविश्वतिमिरा सहसा बभूव।
भूयिष्ठरत्नकिरणा भवती रघूणां
    भूयः प्रतापतपनोदयपूर्वसन्ध्या ॥ **29.14** ॥

प्रीतेन देवि ! विभुना प्रतिपादनीयां
    पादावनि ! प्रतिपदोदितमञ्जुनादाम्।
विद्यां विदुर्भगवतः प्रतिपादनार्हां
    पारायणागमपयोनिधिपारगास्त्वाम् ॥ **29.15** ॥

मुक्तांशुकेसरवती स्थिरवज्रदंष्ट्रा
    प्रह्लादसम्पदनुरूपहिरण्यभेदा।
मूर्तिः श्रियो भवसि माधवपादरक्षे !
    नाथस्य नूनमुचिता नरसिंहमूर्तेः ॥ **29.16** ॥

सम्भावयन्ति कवयश्चतुरप्रचारां
मञ्जुस्वनां महितमौक्तिकपत्रळाङ्गीम्।
स्वाधीनसर्वभुवनां मणिपादुके ! त्वां
रङ्गाधिराजपदपङ्कजराजहंसीम्॥ **29.17** ॥

मुक्तामयूखरुचिरां मणिपादरक्षे !
मञ्जुस्वनां मणिभिराहितवर्णवर्गाम्।
मन्ये मुकुन्दपदपद्ममधुव्रतीनाम्
अन्यामकृत्रिमगिरामधिदेवतां त्वाम्॥ **29.18** ॥

आसाद्य केकयसुतावरदानमूलं
कालं प्रदोषमनिरीक्ष्य रमासहायम्।
मञ्जुप्रणादरहिता मणिपादरक्षे !
मौनव्रतं किमपि नूनमवर्तयस्त्वम्॥ **29.19** ॥

वैडूर्यरम्यसलिला महिता मरुद्भिः
छायावती मरकतोपलरश्मिजालैः।
अश्रान्तमोहपदवीपथिकस्य जन्तोः
विश्रान्तिभूमिरिव शौरिपदावनि ! त्वम्॥ **29.20** ॥

आद्यो रघुक्षितिभुजामभिषेकदीप्तैः
आप्यायितस्तव पदावनि ! रश्मिजालैः।
मन्दीचकार तपनो व्यपनीतभीतिः
मन्दोदरीवदनचन्द्रमसो मयूखान्॥ **29.21** ॥

मान्या समस्तजगतां मणिभङ्गनीला
पादे निसर्गघटिता मणिपादुके ! त्वम्।
अन्तःपुरेषु ललितानि गतागतानि
छायेव रङ्गनृपतेरनुवर्तसे त्वम्॥ **29.22** ॥

रङ्गाधिराजपदपङ्कजमाश्रयन्ती
    हैमी स्वयं परिगता हरिनीलरत्नैः।
सम्भाव्यसे सुकृतिभिर्मणिपादुके ! त्वं
    सामान्यमूर्तिरिव सिन्धुसुताधरण्योः ॥ **29.23** ॥

अभ्यर्चिता सुमनसां निवहैरजस्रं
    मुक्तारुणोपलनखाङ्गुळिपल्लवश्रीः।
श्रेयस्करीं मुरभिदश्चरणद्वयीव
    कान्तिं समाश्रयसि काञ्चनपादुके ! त्वम् ॥ **29.24** ॥

निर्मृष्टगात्ररुचिरा मणिपादुके ! त्वं
    स्नातानुलेपसुरभिर्नवमाल्यचित्रा।
प्राप्ते विहारसमये भजसे मुरारेः
    पादारविन्दपरिभोगमनन्यलभ्यम् ॥ **29.25** ॥

नादे पदावनि ! तथा तव सन्निवेशो
    निर्वेशनक्रममसह्यमपाचिकीर्षुः।
यैरेव लोचनशतैरभिवीक्षते त्वां
    तैरेव पन्नगपतिः श्रुतिमान् बभूव ॥ **29.26** ॥

पादावनि ! स्फुटमयूखसहस्रदृश्या
    विष्णोः पदेन भवती विहितप्रचारा।
त्वद्भक्तियन्त्रितजनप्रथमस्य शम्भोः
    वैकर्तनीमनुकरोति विहारमूर्तिम् ॥ **29.27** ॥

राज्ये वनेऽपि रघुवीरपदोचितायाः
    संस्मृत्य गौतमवधूपरिरक्षणं ते।
मन्ये समाहितधियो मणिपादुके ! त्वां
    मूर्ध्ना भजन्त्यनुदिनं मुनिधर्मदाराः ॥ **29.28** ॥

त्वामाश्रितो मणिमयूखसहस्रदृश्यां
त्वच्छिञ्जितेन सह रङ्गपतिः समुद्यन्।
आशङ्क्यते सुमतिभिर्मणिपादरक्षे !
विद्यासखः सवितृमण्डलमध्यवर्ती ॥ **29.29** ॥

रत्नाश्रितैर्हरिपदं मणिपादुके ! त्वं
स्पृष्ट्वा करैः श्रुतिरसायनमञ्जुनादा।
तत्त्वं तदेतदिति बोधयसीव सम्यक्
वेदान् प्रतारितवतो विविधान् कुदृष्टीन् ॥ **29.30** ॥

आनन्दसूः प्रणयिनामनघप्रसादा
रङ्गाधिराजपदरक्षिणि ! रत्नभासा।
न्यस्ते मुहुर्निजभरे स्थिरतां भजन्त्याः
वर्णांशुकं वितरसीव वसुन्धरायाः ॥ **29.31** ॥

त्वं चित्रभानुरसि रत्नविशेषयोगात्
भूम्ना निजेन परिपुष्यसि पावकत्वम्।
स्वेनैव शौरिचरणावनि ! चन्द्ररूपा
तेजस्त्रयीव मिळिताऽसि तमोपहा नः ॥ **29.32** ॥

प्रौढप्रवाळरुचिरा भुवनैकवन्द्या
रङ्गाधिराजचरणावनि ! रम्यचन्द्रा।
सम्भिन्नमौक्तिकरुचिः सततं प्रजानां
तापात्ययं दिशसि तारकितेव सन्ध्या ॥ **29.33** ॥

रङ्गेश्वरस्य पुरतो मणिपादुके ! त्वं
रत्नांशुभिर्विकिरसि स्फुटभक्तिबन्धा।
पादौ विहारयितुमद्भुतसौकुमार्यौ
प्रायः सरोजकुमुदोत्पलपत्रपङ्क्तिम् ॥ **29.34** ॥

आसन्नवृत्तिरवरोधगृहेषु शौरेः
    आपादयस्यनुपदं वरवर्णिनीनाम्।
आलग्नरत्नकिरणा मणिपादुके ! त्वं
    मञ्जुस्वना मदनबाणनिघर्षशङ्काम्॥ 29.35 ॥

पर्याप्तमौक्तिकनखा स्फुटपद्मरागा
    रेखाविशेषरुचिरा ललितप्रचारा।
रङ्गाधिराजपदयोर्मणिपादुके ! त्वं
    सायुज्यमाश्रितवतीव समस्तवन्द्या॥ 29.36 ॥

प्राप्ताभिषेका मणिपादुके ! त्वं
    प्रदीप्तरत्ना रघुराजधान्याः।
प्रदक्षिणप्रक्रमणादकार्षीः
    प्राकारमाग्नेयमिव प्रभाभिः॥ 29.37 ॥

रत्नासने राघवपादरक्षे !
    प्रदीप्यमानास्तव पद्मरागाः।
प्रायो नरेन्द्रान् भरतस्य जेतुः
    प्रतापवह्नेरभवन् प्ररोहाः॥ 29.38 ॥

शुभप्रणादा भवती श्रुतीनां
    कण्ठेषु वैकुण्ठपतिंवराणाम्।
बध्नासि नूनं मणिपादरक्षे !
    माङ्गल्यसूत्रं मणिरश्मिजालैः॥ 29.39 ॥

विचित्रवर्णा श्रुतिरम्यशब्दा
    निषेव्यसे नाकसदां शिरोभिः।
मधुद्विषस्त्वं मणिपादरक्षे !
    श्रेयस्करी शासनपत्रिकेव॥ 29.40 ॥

स्थिरा स्वभावान्मणिपादुके ! त्वं
    सर्वंसहा स्वादुफलप्रसूतिः।
पृथ्वीव पद्भ्यां परमस्य पुंसः
    संसृज्यसे देवि ! विभज्यसे च ॥ 29.41 ॥

पश्यन्ति रङ्गेश्वरपादरक्षे !
    पूजासु ते संहितपुष्पजालाम्।
मृगीदृशो वासवरत्नरेखां
    सचित्रपुङ्खामिव मन्मथज्याम् ॥ 29.42 ॥

करैरुदग्रैः स्फुरतां मणीनां
    मञ्जुस्वना माधवपादुके ! त्वम्।
अनूपदेशे कनकापगायाः
    कलेः प्रवेशं प्रतिषेधसीव ॥ 29.43 ॥

आक्रान्तवेदिर्भवती तदानीम्
    अदर्शि मुक्तान्वितशोणरत्ना।
करग्रहार्थं भरतेन भूम्याः
    लाजोत्करैर्वह्निशिखेव कीर्णा ॥ 29.44 ॥

पत्रळा मणिगणैर्हिरण्मयी
    भासि रङ्गपतिरत्नपादुके !।
केळिमण्टपगतागतोचिता
    भूमिकेव गरुडेन कल्पिता ॥ 29.45 ॥

उन्नतं बलिविरोधिनस्तदा
    पादुके ! पदसरोजमाश्रिता।
मौक्तिकस्तबकमध्यसम्मितं
    व्योम षड्वदतुलामलम्भयः ॥ 29.46 ॥

कोमलाङ्गुळिनिवेशयन्त्रिका
    न्यस्तमौक्तिकमयूखदन्तुरा।
मङ्गळानि वमसीव देहिनां
    रङ्गराजमणिपादुके ! स्वयम् ॥ 29.47 ॥

पङ्कजासहचरस्य रङ्गिणः
    पादुके ! निजपदादनन्तरम्।
न्यस्यतस्त्वयि जगन्ति जायते
    नागभोगशयनं निरङ्कुशम् ॥ 29.48 ॥

साधयन्ति मधुवैरिपादुके !
    साधवः स्थिरमुपायमन्तिमम्।
त्वत्प्रवृत्तिविनिवर्तनोचित -
    स्वप्रवृत्तिविनिवर्तनान्वितम् ॥ 29.49 ॥

नन्दसूनुपदपद्ममिन्दिरा
    पाणिपल्लवनिपीडनासहम्।
पादुके ! तव बलेन पर्यभूत्
    ऊष्मळामुरगमौळिशर्कराम् ॥ 29.50 ॥

मणिनिकरसमुत्थैः सर्ववर्णा मयूखैः
    प्रकटितशुभनादा पादुके ! रङ्गभर्तुः।
निखिलनिगमसूतेर्ब्रह्मणस्तत्सनाथाम्
    अवगमयसि हृद्यामर्धमात्रां चतुर्थीम् ॥ 29.51 ॥

श्रुतिविषयगुणा त्वं पादुके ! दैत्यहन्तुः
    सततगतिमनोज्ञा स्वेन धाम्ना ज्वलन्ती।
जनितभुवनवृद्धिर्दृश्यसे स्थैर्ययुक्ता
    विधृतनिखिलभूता वैजयन्तीव माला ॥ 29.52 ॥

रघुपतिपदसङ्गाद्राज्यखेदं त्यजन्ती
पुनरपि भवती स्वान् दर्शयन्ती विहारान्।
अभिसमधितवृद्धिं हर्षकोलाहलानां
जनपदजनितानां ज्यायसा शिञ्जितेन॥ **29.53**॥

हरिचरणमुपघ्नं पादुके! संश्रितायाम्
अधिगतबहुशाखं वैभवं दर्शयन्त्याम्।
अभजत विधिहस्तन्यस्तधर्मद्रवायां
त्वयि मुकुळसमृद्धिं मौक्तिकश्रीस्तदानीम्॥ **29.54**॥

कनकरुचिरकान्तिः कल्पिताशोकभारा
कृतपदकमलश्रीः क्रीडता माधवेन।
दिशिदिशि सुमनोभिर्दर्शनीयानुभावा
सुरभिसमयलक्ष्मीं पादुके! पुष्यसि त्वम्॥ **29.55**॥

प्रणिहितपदपद्मा पादुके! रङ्गभर्तुः
शुभतरगतिहेतुश्चारुमुक्ताप्रवाळा।
स्थिरपरिणतरागां शुद्धबोधानुबद्धां
स्वजनयसि मुनीनां त्वन्मयीं चित्तवृत्तिम्॥ **29.56**॥

विरचितनवभागा रत्नभेदैर्विचित्रैः
विविधविततरेखाव्यक्तसीमाविभागा।
हरिचरणसरोजं प्रेप्सतामर्चनीयं
प्रथयसि नवनाभं मण्डलं पादुके! त्वम्॥ **29.57**॥

परिणतगुणजाला पङ्क्तिभिर्मौक्तिकानां
बहुविधमणिरश्मिग्रन्थिबन्धाभिरामा।
रघुपतिपदरक्षे! राजवाह्यस्य कुम्भे
कलितरुचिरभूस्त्वं काऽपि नक्षत्रमाला॥ **29.58**॥

चरितनिखिलवृत्तिश्चारुपद्मासनस्था
गुणनिबिडितमुक्तापङ्क्तिबद्धाक्षमाला।
सविधमधिवसन्ती पादुके ! रङ्गभर्तुः
चरणकमलमन्तर्बिम्बितं ध्यायसीव ॥ **29.59** ॥

अनुपधि परिरक्षन्नेकपुत्राभिमानात्
भुवनमिदमशेषं पादुके ! रङ्गनाथः।
निजपदनिहितायां देवि ! तिष्ठन् व्रजन् वा
त्वयि निहितभरोऽभूत् किं पुनः स्वापमृच्छन् ॥ **29.60** ॥

त्वरितमुपगतानां श्रीमतो रङ्गभर्तुः
त्वदुपहितपदस्य स्वैरयात्रोत्सवेषु।
मुखरयति दिगन्तान्मुह्यतां त्वत्प्रशस्तौ
विहितकुसुमवृष्टिर्व्योवघोषी सुराणाम् ॥ **29.61** ॥

मनसि नियमयुक्ते वर्तमाना मुनीनां
प्रतिपदमुपयान्ती भावनीयक्रमत्वम्।
श्रुतिरिव निजशब्दैः पादुके ! रङ्गभर्तुः
पदमनितरगम्यं व्यङ्क्तुमर्हा त्वमेव ॥ **29.62** ॥

अविकलनिजचन्द्रालोकसन्दर्शनीया
प्रतिकलमुपभोग्या पादुके ! रङ्गभर्तुः।
मुकुळयितुमशेषं मौक्तिकज्योत्स्नया नः
प्रभवसि तिमिरौघं पौर्णमासी निशेव ॥ **29.63** ॥

हंसश्रेणीपरिचितगतिर्हारिणी कल्मषाणां
मौळौ शम्भोः स्थितिमधिगता मुग्धचन्द्रानुबद्धा।
राज्ञामेका रघुकुलभुवां सम्यगुत्तारिका त्वं
काले तस्मिन् क्षितिमधिगता पादुके ! जाह्नवीव ॥ **29.64** ॥

स्वच्छाकारां श्रुतिसुरभितां स्वादुभावोपपन्नां
मार्गेमार्गे महितविभवां पादुके ! तीर्थभेदैः।
शीतस्पर्शां श्रमविनयिनीं गाहते मन्दमन्दं
क्रीडालोलः कमलनिलयादत्तहस्तो युवा त्वाम् ॥ **29.65** ॥

अभ्यस्यन्त्योः क्रममनुपमं रङ्गभर्तुर्विहारे
स्थानेस्थाने स्वरपरिणतिं लम्भितस्तत्तदर्हाम्।
पर्यायेण प्रहितपदयोः पादुके ! श्रुत्युदारः
शिञ्जानादः स्फुरति युवयोः शृङ्खलाबन्धरम्यः ॥ **29.66** ॥

आसन्नानां दिवसमपुनर्नक्तमापादयन्ती
स्फीतालोका मणिभिरभितः प्राणिनामस्तदोषा।
प्रह्वैर्जुष्टा विबुधनिवहैः पादुके ! रङ्गभर्तुः
पादाम्भोजे दिशति भवती पूर्वसन्ध्येव कान्तिम् ॥ **29.67** ॥

रम्यालोका ललितगमना पद्मरागाधरोष्ठी
मध्ये क्षामा मणिवलयिनी मौक्तिकव्यक्तहासा।
श्यामा नित्यं हरितमणिभिः शार्ङ्गिणः पादरक्षे !
मन्ये धातुर्भवसि महिळानिर्मितौ मातृका त्वम् ॥ **29.68** ॥

स्थित्वा पूर्वं क्वचन भवती भद्रपीठस्य मध्ये
रत्नोदञ्चत्किरणनिकरा रङ्गिणः पादरक्षे !।
व्याकीर्णानां नृपतिविरहाद्देवि ! वर्णाश्रमाणां
नूनं सीमाविभजनसहं निर्ममे सूत्रपातम् ॥ **29.69** ॥

मातर्मञ्जुस्वनपरिणतप्रार्थनावाक्यपूर्वं
निक्षिप्तायां त्वयि चरणयोः पादुके ! रङ्गभर्तुः।
त्वय्यायत्तं किमपि कुशलं जानतीनां प्रजानां
पर्याप्तं तन्न खलु न भवत्यात्मनिक्षेपकृत्यम् ॥ **29.70** ॥

नित्यं रङ्गक्षितिपतिपदन्यासधन्यात्मनस्ते
शिञ्जानादं श्रवणमधुरं पादुके ! दीर्घयन्तः।
काले तस्मिन् करणविगमक्लेशजातं विहन्युः
सन्तापं नस्तरुणतुळसीगन्धिनो गन्धवाहाः ॥ **29.71** ॥

संसाराध्वश्रमपरिणतं संश्रितानां जनानां
तापं सद्यः शमयितुमलं शार्ङ्गिणः पादुके ! त्वम्।
चन्द्रापीडे प्रणमति नवां चन्द्रिकामापिबद्भिः
धारानिर्यत्सलिलकणिकाशीकरैश्चन्द्रकान्तैः ॥ **29.72** ॥

वज्रोपेतां वलभिदुपलश्यामलां मञ्जुघोषां
मुक्तासारां मधुरचपलां वीक्ष्य विष्णोः पदे त्वाम्।
हर्षोत्कर्षादुपरि चलयन् पादुके ! चन्द्रकान्तं
धत्ते नित्यं धृतघनरुचिस्ताण्डवं नीलकण्ठः ॥ **29.73** ॥

श्रीरङ्गेन्दोश्चरणकमलं तादृशं धारयन्ती
काले काले सह कमलया कृतयात्रोत्सवश्रीः।
गत्वागत्वा स्वयमनुगृहद्वारमुन्निद्रनादा
पौरान्नित्यं किमपि कुशलं पादुके ! पृच्छसीव ॥ **29.74** ॥

चतुरविहारिणीं रुचिरपक्षरुचिं भवतीं
मनसिजसायकासनगुणोचितमञ्जुरवाम्।
अनुपदमाद्रियेमहि महेन्द्रशिलामहितां
हरिचरणारविन्दमकरन्दमधुव्रतिकाम् ॥ **29.75** ॥

कनकरुचा जटामुरगमौळिमणीन् मणिभिः
त्रिदिवतरङ्गिणीं तरळमौक्तिकदीधितिभिः।
कुटिलतया क्वचिच्छशिकलामधरीकुरुषे
मुररिपुपादुके ! पुरभिदः शिरसा विधृता ॥ **29.76** ॥

काले तल्पभुजङ्गमस्य भजतः काष्ठां गतां शेषतां
　मूर्तिं कामपि वेद्मि रङ्गनृपतेश्चित्रां पदत्रद्वयीम्।
सेवानम्रसुरासुरेन्द्रमकुटीशेषापटीसङ्गमे
　मुक्ताचन्द्रिकयेव या प्रथयते निर्मोकयोगं पुनः॥ **29.77**॥

चन्द्रापीडशिखण्डचन्द्रशिखरच्योतत्सुधानिर्झर -
　स्तोकाश्लिष्टसुरेन्द्रशेखररजःस्त्यानां स्तुमः पादुकाम्।
ब्रह्मस्तम्बविभक्तसीमविविधक्षेत्रज्ञसर्गस्थिति -
　ध्वंसानुग्रहनिग्रहप्रणयिनी या सा क्रिया रङ्गिणः॥ **29.78**॥

लक्ष्मीनूपुरशिञ्जितेन गुणितं नादं तवाकर्णयन्
　आजिघ्रन्निगमान्तगन्धतुळसीदामोत्थितं सौरभम्।
काले कुत्रचिदागतं करुणया सार्धं त्वया चाग्रतः
　पश्येयं मणिपादुके ! परतरं पद्मेक्षणं दैवतम्॥ **29.79**॥

वहति क्षितिव्यवहितां सोऽपि त्वां गतिषु पादुके ! रङ्गी।
कमठपतिभुजगपरिबृढकरिवरकुलशिखरिभूमिकाभेदैः॥ **29.80**॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे प्रकीर्णपद्धतिः एकोनत्रिंशी॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥